प्रचयः, निश्चयः[1], [A]शिलोच्चयः, [B]रक्षोनिकायः, [2]काशीनिकायः, आकायः, कायः, गोमयनिकायः, भिक्षुनिकायः, सूकरनिचयः[3], [C]अपचायः, [D]चायः, चापः-चायः, चिकीषः-चिचीषः, चेचीयः;

चेतुम्, चापयितुम्-चाययितुम्, चिकीषितुम्-चिचीषितुम्, चेचीयितुम्;

चितिः, [4]पुष्पप्रचायिका, चापना-चायना, चिकीषा-चिचीषा, चेचीया;

चयनम्, चापनम्-चायनम्, चिकीषणम्-चिचीषणम्, चेचीयनम्;

चित्वा, चापयित्वा-चाययित्वा, चिकीषित्वा-चिचीषित्वा, चेचीयित्वा;

सञ्चित्य, प्रचाप्य-प्रचाय्य, प्रचिकीष्य-प्रचिचीष्य, प्रचेचीय्य;

चायम् २ } चापम् २-चायम् २, } चिकीषम् २-चिचीषम् २, }
चित्वा २ } चापयित्वा २-चाययित्वा २, } चिकीषित्वा २ चिचीषित्वा २, }
चेचीयम् २; }
चेचीयित्वा २; }

[5]चित्रम्.

1. 'ग्रहवृदृनिश्चिगमश्च' (3-3-58) इति अप्। अचोऽपवादः। स्वरे भेदः।
2. 'निवासचितिशरीरोपसमाधानेष्वादेश्च कः' (3-3-41) इति घञ्। धात्वादेः ककारश्च। निवासे—काशीनिकायः। चितिः=चयनम्-आकायः। आचीयतेऽस्मिन् इष्टका इत्याकायः। 'आकायमग्निं चिन्वीत' इति विधिः। शरीरे-कायः। चीयतेऽस्मिन् अस्थ्यादिकम् इति कायः=शरीरम्। यद्वा, चीयते=आर्ज्यते सुखदुःखादिकं कर्मणिनेनेति कायः। करणे घञ्। उपसमाधानम्=राशीकरणम्। तत्र यथा—गोमयनिकायः-गोमयसमूह इति यावत्।
3. 'सङ्घे चानौत्तराधर्ये' (3-3-42) इति घञ्। 'अनौत्तराधर्ये' इत्युक्तत्वात् सूकरनिचयः इत्यत्र अजेव।
4. 'संज्ञायाम्' (3-3-109) इति स्त्रियां भावे ण्वुल्।
5. 'अमिचिमि—' [द.-उ. 8-86] इति क्त्रप्रत्ययः। चिनोति, चीयते वा तदिति चित्रम्=नानाकारलेख्यम्, अद्भुतं च।

A. 'अमुः शिलोच्चयांस्तुङ्गान् उत्तेरुरतरान् नदान्।
आशंसवो लवं शत्रोः सीतायाश्च विनिश्चयम्॥' भ. का. 7-55.

B. 'सीता रक्षोनिकायेषु स्तोककायैश्छलेन च।
मृग्या शत्रुनिकायानां व्यावहासीमनाश्रितैः॥' भ. का. 7-42.

C. 'करतलैरपचायमथेक्षणैरपचयं च वनेषु जनेषु च।' चम्पूरामायणे 4-3.

D. 'व्रीहेस्त्रयोऽत्र चायाः तिलस्य खारीमितः प्रचायोऽयम्।
इति संख्यामानाभ्यां प्रमितत्वे ऽन्यत्र पश्य धान्यचयम्॥' इति प्रक्रियासर्वस्वे।